## श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा – प्रथमपत्रिका

दिनाङ्क:- ३०.८.२०२० पूर्वाह्ण: १०.००त: १.०० पर्यन्तम्

समय:- होरात्रयम् अङ्का: - १००

<u>सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:</u>

1. अष्टानाम् एकवाक्येन उत्तरं लिखत। 8

१. कस्य पाण्ड्यराजस्य शासनसमये हर: समदृश्यत ?

२. क: जनपद: वसुधारेति विप्रै: अगृह्यत ?

३. पञ्च पञ्च राजतानि पुण्डरीकाणि केन प्रेषितानि ?

४. बाणभट्टविषये प्रसिद्धा लोकोक्ति: का ?

५. देवव्रतस्य गुरु: क: ?

६. शुकनास: कस्य मन्त्री आसीत् ?

७. अविनीतसम्पद: कथं भूता: ?

८. कया सह उर्वशी अपहृता ?

९. चन्द्रकेतु: कस्य पुत्र: ?

१०. शङ्खचूड: कस्मिन् कुले जात: ?

2. षण्णां वाक्यद्वयेन उत्तरं लिखत। 12

१. नीलकण्ठदीक्षितस्य शिवलीलार्णवे कस्य वर्णनं कथं कृतमस्ति ?

२. अट्टहासनाम कृपाण: कथम् आसीत् ?

३. चित्ररथेन आहूत: विक्रम: किमूचे ?

४. यदा मन्दाकिनी रथरश्मीन् जग्राह तदा गाङ्गेय: किमूचे ?

५. अप्सरस: कुत: उच्चै: चुक्रुशु: ?

६. धनमदान्धानां के गुरव: के च उपदेष्टार: ?

७. कीदृश: विग्रह: कं हन्ति ?

८. लवकुशौ वीक्ष्य राम: किमित्यचिन्तयत् ?

3. **त्रयाणां पञ्चषै: वाक्यै: उत्तरं लिखत ।** 9

१. यशोवती कथं भूता आसीत् ?

२. "कन्याहरणे मम अपराध: नास्ति" इति भीष्म: कथम् उपपादितवान् ?

३. लक्ष्मी: क्षीरसागरात् कानि गृहीतवती ?

४. चन्द्रपूजनं कृत्वा काशीराजपुत्री राजानं किमुवाच ?

५. नायक: वनं कथं वर्णयति ?

4. **त्रयाणां ससन्दर्भं विवृणुत ।** 9

१. शक्त एवाहं स्वयमेव सारथ्यं कर्तुं प्रहर्तुं च ।

२. न तितिक्षा सममस्ति साधनम्।

३. उपकृतं खलु दानवै: ।

४. स्वत: प्रकाशानि आवयो: अस्त्राणि।

५. अनाहतान्यपि मङ्गलतूर्याणि रेणुः।

5. **एकस्य पद्यस्य सान्वयमर्थं लिखत ।** 4

१. सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिन:।
शरीरकस्यापि कृते मूढा: पापानि कुर्वते ॥

२. न कुलं न गृहं न बान्धवा न च वर्णाश्रमयन्त्रणाऽपि न: ।
अवधूतपदे निषेदुषाम् अभिधा सिद्ध इति स्फुटैव ते ॥

6. **श्लोकद्वयं पूरयत ।** 6

१. पापौघं ------------------------------ मह्यम् ॥

२. शान्त्याद्या: ------------------------ मह्यम् ॥

३. स्पृहणीय ---------------------------- समुन्नते:॥

7. एकस्य कवे: देश-काल-कृति-वैशिष्ट्य-विषये लिखत। 4

१. कालिदास: २. भारवि:

8. चतुर्णां रूपाणि परिचाययत। 4

१. अभिभूय २. शतक्रतुना ३. आत्मानं
४. वर्त्म ५. जज्ञे ६. करवाम

9. चत्वारि पदानि संस्कृतवाक्येषु योजयत। 4

१. प्रणाय्य: २. विविक्ते ३. रय:
४. अविमृश्य ५. विनयप्रमाथी ६. क्ष्मा

10. चतुर्णां पर्यायपदं लिखत। 4

१. मृगलाञ्छन: २. कैवर्त: ३. कुम्भीलक:
४. भूधर: ५. अम्बरम् ६. कुड्मल:

11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत। 6

१. व्यतरद्भिषजाम् २. अप्यपहन्ति ३. मणेरतिनैष्टुर्यम्
४. वपुषागत्य ५. महदुपजनयति ६. सदैतदधिकृत्य

12. चतुर्णाम् एकपदं लिखत। 4

१. यागं कृतवान् २. गन्तुम् इच्छा ३. चौर्येण अवाप्तं धनम्
४. कुबेरस्य इयम् ५. वक्षसि धृता माला ६. कुन्त्या: अपत्यं पुमान्

13. चतुर्णां व्याकरणविशेषं लिखत। 8

१. कुप्यन्ति हितवादिने २. विजयस्व ३. रोषमयम्
४. भगवते रोचते ५. सन्तमसम् ६. अलमस्मै कर्मणे

14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत। 8

| | | |
|---|---|---|
| १. वृक्षान्तरम् | २. पञ्चपात्रम् | ३. स्मयमानमुखाम्बुज: |
| ४. पार्वतीश: | ५. रथगजतुरगा: | ६. यथेच्छम् |

15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत। 6

| | | |
|---|---|---|
| १. चकार | २. अभजत | ३. अगात् |

16. चतुर्णां रिक्तस्थानानि पूरयत। 4

१. नरपालकराग्रवर्तिनं ------ विचकर्ष।

२. देवक्या: ------------इव सम्बभूव हर्ष:।

३. गुरुं विजेष्यसे---------- हि जामदग्न्य:।

४. खगाधिपस्य हृदयं --------मन्ये कृतम् ।

५. बाणभट्टस्य तनय: -------------------।

---

श्रीसुरसरस्वतीसभा, शृङ्गेरी

प्रवेशपरीक्षा - द्वितीयपत्रिका

दिनाङ्क: - ३०.८.२०२० अपराह्ण: - १.३०त: ३.००पर्यन्तम्

समय: - सार्धैकहोरा अङ्का: ५०

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:

1. विषयद्वयं सोदाहरणं विवृणुत । 10

१. सन्नन्तधातुरूपाणि

२. अप्रस्तुतप्रशंसा

३. अनीयर्, शतृ, शानच् -प्रत्यया:

2. विषयद्वयं सोदाहरणं विवृणुत । 8

१. कर्मधारय समास:

२. प्रयोगा:

३. शालिनीवृत्तम्

3. त्रयाणां सर्वाणि रूपाणि तत्तल्लकारे लिखत। 9

१. जुहोति २. आशासिष्यते ३. ददातु

४. ममे ५. अस्तु ६. जहौ

4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत। 4

१. द्रष्टा २. पोषक: ३. भुक्तवत्

४. भर्त्री ५. गायत् ६. त्यक्तवान्

5. द्वयो: प्रयोगं व्यत्यस्यत। 3

१. मधु: हरिणा हत: । २. असि: तीक्ष्ण: भवति ।

३. पान्थेन माणवक: पृच्छ्यते । ४. महर्षिभि: तप: क्रियते ।

6. त्रयाणां विग्रहवाक्यं विलिख्य समासनाम लिखत। 6

| | | |
|---|---|---|
| १. मध्येगङ्गम् | २. पूजापुष्पम् | ३. गुरुदक्षिणा |
| ४. पुरुषव्याघ्र: | ५. शाकपार्थिव: | ६. घनश्याम: |

7. मातृभाषया अनुवदत । 5

१. यागे समागतान् सर्वानपि ऋत्विज: दशरथ: पूजितवान्।

२. तव शिष्यं मां शाधि इति अर्जुन: श्रीकृष्णम् उवाच।

३. न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायतां यान्ति।

४. हरिचरणयो: प्रक्षिप्तोऽयं पुष्पाञ्जलि: कल्याणं नो विधत्ताम्।

५. भुञ्जते ते त्वघं पापा: ये पचन्त्यात्मकारणात्।

8. संस्कृतभाषायाम् अनुवदत | 5

1. ಯೋಧರು ಧೈರ್ಯದಿಂದ ರಣಭೂಮಿಗೆ ಹೋದರು.

   The warriors went to the battle field with courage.

2. ಮಗುವೇ, ಅಳಬೇಡ. ಹಣ್ಣನ್ನು ತಿನ್ನು.

   Child! do not cry! eat fruit.

3. ವಿದ್ವಾಂಸರು ತಮ್ಮ ಉಪದೇಶದಿಂದ ಜನರ ಸಂಶಯಗಳನ್ನು ನಿವಾರಿಸುವರು.

   Scholars clear the doubts of the people by their advice.

4. ಹೆಂಗಸರು ತಮ್ಮ ಕಣ್ಣುಗಳಿಗೆ ಕಾಡಿಗೆಯನ್ನು ಹಚ್ಚಿಕೊಳ್ಳುತ್ತಾರೆ.

   Ladies apply **collyrium/ eyetex** in their eyes.

5. ಯಶೋದೆಯು ಶ್ರೀಕೃಷ್ಣನನ್ನು ವರಳಿಗೆ ಕಟ್ಟಿದಳು.

   Yashoda tied Sri Krishna to the mortar.

---------------------------